# Panduranga Stotram 1

# પાણ્ડુરઙ્ગસ્તોત્રમ્ ૧

## Document Information

Text title : Panduranga Stotram 1

File name : pANDurangastotram1.itx

Category : vishhnu, vishnu, moropanta, stotra

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 23, 2023

*sanskritdocuments.org*

Panduranga Stotram 1

# પાણ્ડુરઙ્ગસ્તોત્રમ્ ૧

(પ્રથમં)

(અનુષ્ટુબ્ વૃત્તમ્)

પ્રસાદં કામયે નિત્યં (૧)સમદં પાણ્ડુરઙ્ગજં ।
નચોચ્ચૈઃશ્રવસં નિત્યં સમદં પાણ્ડુરં ગજમ્ ॥ ૧॥

વન્દે નિજયશઃપાનનિષ્ઠં તં સ્વરસાદરં(૨) ।
(૩)શુદ્ધપ્રેમ્ણામિષ્ટકાયાં તિષ્ઠન્તં સ્વરસાદરમ્ ॥ ૨॥

પાણ્ડુરઙ્ગં સકૃન્નત્વા કલિના મલિના અપિ ।
ભવન્તિ ભાવુકા ભાસ્વદુચ્ચયઃ(૪) શુચયઃ સદા ॥ ૩॥

સંસૃતૌ કલિકાલે યઃ સદરઃ (૫) સદરસ્તુતેઃ(૬) ।
વિઠ્ઠલાદભયં પ્રાપ્તઃ કરુણાવરુણાલયાત્ ॥ ૪॥

યચ્ચેતઃ પાણ્ડુરઙ્ગસ્ય સદા ચરણસાદરમ્ ।
તં(૭) સન્તં નાન્યમૂચુર્જ્ઞાઃ સદાચરણસાદરમ્ ॥ ૫॥

વિઠ્ઠલેતિ જપેન્નામ પાણ્ડુરઙ્ગસ્ય યઃ સદા ।
કૃપાકટાક્ષા ન વિભોરન્ત્યજં તં ત્યજન્ત્યહો ॥ ૬॥

યઃ પિબત્યસકૃન્નામ પ્રભોર્ભવગદાર્દિતઃ ।
હ્રેપયત્યમૃત(૮) કિં ન સ કલૌ સકલૌષધમ્ ॥ ૭॥

મોચિતાઃ પાણ્ડુરઙ્ગેણ પતિતા અતિતાપતઃ ।
અયમેવ કલૌ કીર્ત્યા નિજયા વિજયાવહઃ ॥ ૮॥

નામ્ના યઃ પાતિ યમલં(૯) નામ્નાયઃ સ્તોતુમીશ્વરમ્(૯) ।
યશસા યસ્ય સદ્વૃન્દં સમહં(૧૦) તમહં ભજે ॥ ૯॥

વૈરસ્યદર્શિના સ્વર્ગે કલૌ વૈરસ્ય કારિણા ।
યશસાસ્ય પ્રભોસ્તીર્થે સજ્જના મજ્જનાલસાઃ ॥ ૧૦॥

(૧૧) વદન્તિ વિઠ્ઠલં વિજ્ઞા જડેભ્યોઽપ્યતિદુર્લભા ।
યા દીયતે પ્રભો! ભક્તવશ! સા યશસા તવ ॥ ૧૧॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રા યેઽન્યેઽપિ સઙ્કરાઃ ।
રઙ્કરાજમુખાઃ સર્વે કૃતાઃ શ્રીશેન શઙ્કરાઃ ॥ ૧૨॥

પૂર્વં પ્રયાસેનાવિદ્યાવિનાશમલભન્ જનાઃ ।
અદ્ય નામ્ના પ્રભોઃ કષ્ટં વિનાશમલભં જનાઃ ॥ ૧૩॥

પાણ્ડુરઙ્ગપુરં મોહો (૧૨) વદત્યત્રત્યમાનસે ।
કથં તિષ્ઠામિ વિજયે હન્ત તેઽહં તતે સતિ ॥ ૧૪॥

નામસઙ્કીર્તનપ્રાયં પાણ્ડુરઙ્ગપુરં વિના ।
ભ્રમમ્ભવતિ મેદિન્યાં પરિતોઽપારતોષભાક્ ॥ ૧૫॥

પાણ્ડુરઙ્ગપુરે પીતપ્રભુનામયશઃસુધાઃ ।
બુધાઃ સ્મરન્તિ ન સ્વર્ગં રષ્ટચક્રગદાયુધાઃ ॥ ૧૬॥

તીર્થાન્યાયાતિ સર્વાણિ દૈવતાન્યુસ્સુકાનિ યત્ ।
દ્રષ્ટું ભગવતઃ કો ન ચત્વરં સત્વરં વ્રજેત્ ? ॥ ૧૭॥

પાણ્ડુરઙ્ગપુરં પ્રાપ્ય સર્વો ના (૧૩) રદતિ સ્ફુટમ્ ।
હરિનામયશોગાનનિરતોઽવિરતોત્સવઃ ॥ ૧૮॥

પાણ્ડુરઙ્ગપુરં સન્તો ભૂવૈકુણ્ઠં વદસ્યહો! ।
એતત્તુ સર્વસુલભં કુલભઞ્જનમંહસામ્(૧૪) ॥ ૧૯॥

પ્રવર્તિતેન પરમામૃતસત્રેણ સર્વદા ।
પુણ્ડરીકેણ સર્વોઽપિ સત્રપઃ(૧૫) સત્રપઃ(૧૬) કૃતઃ ॥ ૨૦॥

પુણ્ડરીકેણ સર્વાર્થૈઃ સત્કૃતં સત્કૃતં તથા ।
બ્રહ્માણ્ડેત્ર ન કેનાપિ કવિના ભવિનાઽમલમ્(૧૭) ॥ ૨૧॥

અમુના યમુનારોધઃ પૂર્વં ભીમરથીતટં ।
પશ્ચાદલઙ્કૃત ગોપચ્છદ્મના પદ્મનાભિના(૧૮) ॥ ૨૨॥

દયાલુના ભગવતા પાણ્ડુરઙ્ગેણ બન્ધુના ।
દીના હીના નિજગતિં ગમિતા અમિતા જનાઃ ॥ ૨૩॥

પાણ્ડુરઙ્ગઃ પ્રભુભક્તબહુમાનવશંવદઃ ।
બિભર્તિ ભર્તા જગતાં શિરસાતિરસાચ્છિવમ્(૧૯) ॥ ૨૪॥

શ ृણ્વત્રભઙ્ગાનનિશં તૃપ્તો નાદ્યાપિ વિઠ્ઠલઃ ।
કથં હરન્તુ ન સતામુક્તયો મુક્તયોગિનઃ(૨૦) ॥ ૨૫॥

ધીઃ શ્રિયં જનતા ભક્તૌ તામસીમામુદારતાં(૨૧) ।
જાનાત્વચ્છા(૨૨) પ્રભોર્વેત્તિ તામસીમામુદારતામ્ ॥ ૨૬॥

મધુપા અપ્સુ રાજીવં, સુરા જીવં(૨૩) યથા દિવિ ।
ઉપાસતે તથા સન્તં પાણ્ડુરઙ્ગપુરે જનાઃ ॥ ૨૭॥

પાણ્ડુરઙ્ગપુરસ્થા યે જીવન્મુક્તા હિ તેઽખિલાઃ ।
યત્પ્રભૂક્તિઃ સ્વતીર્થાપ્તમજ્જના મજ્જના(૨૪) ઇતિ ॥ ૨૮॥

મજ્જનં ચન્દ્રભાગાયાં, પાણ્ડુરઙ્ગસ્ય દર્શનમ્ ।
કીર્તનશ્રવણં યસ્ય સ (૨૫)મહાસમહા ભવે ॥ ૨૯॥

તીર્થ ક્ષેત્રં પાણ્ડુરઙ્ગો નામસઙ્કીર્તનં કલૌ ।
મલૌઘહૃત્સ્વમહસા સહસા રચિતેંઽજલૌ ॥ ૩૦॥

વિદા(૨૬) જ્ઞાનેન ઠાન્ શૂન્યાન્ લાતિ ગૃહ્ણાતિ વિઠ્ઠલ ।
નિરુક્તમિદમસ્માકં ચરમં પરમં બલમ્ ॥ ૩૧॥

જડોદ્ધારયશોગ્રન્થગ્રહહ્રીતસુમેધસે ।
નમો ભગવતે તસ્મૈ પાણ્ડુરઙ્ગાય વેધસે ॥ ૩૨॥

નમોઽસ્તુ પિતૃભક્તાય પુણ્ડરીકાય સાધવે ।
જડોદ્ધારવ્રતં પુણ્યપ્રભાવાદ્યસ્ય માધવે ॥ ૩૩॥

જ્ઞાનદેવૈકનાથાદ્યા નામદેવાદયોઽપરે ।
તેભ્યો નમોઽસ્તુ યૈર્ભક્તયા રાઞ્જિતોઽરં જિતોઽજિતઃ(૨૭) ॥ ૩૪॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં પાણ્ડુરઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

ટિપ્પણિ

૧। સમદં શમદમ્ ।

૨। સ્વે આત્મનિ યો રસસ્તસ્મિન્નાદરો યસ્ય તમ્ ।

૩। સ્વરે, શુદ્ધપ્રેમણા ગાને સાદરમ્ ।

૪। ભાસ્વદ્રુચયઃ સૂર્યકાન્તયઃ ।

૫। દરેણ ભીત્યા સહિતઃ ।

૬। સદ્ભિઃ અરં પ્રભૂતં સ્તુતિર્યસ્ય તસ્માત્ ।

૭। જ્ઞાઃ પણ્ડિતાસ્તં સન્તં સદાચરણે સાદરં નાન્યમૂચુરિત્યન્વયઃ ।
૮। અમૃતં સઃ પુરુષઃ કલૌ સકલૌષધં શુણ્ઠીં ન હ્રેપયતિ કિં ? ઇત્યન્વયઃ ।
૯। યમીશ્વરં સ્તોતુમામ્નાયો નાલમિત્યન્વયઃ ।
૧૦। સાનન્દમ્ ।
૧૧। વિજ્ઞાઃ પણ્ડિતા વિઠ્ઠલં વદન્તિ । હે ભક્તવશ ! અતિદુર્લભા યા મુક્તિર્જડેભ્યોઽપિ દીયતે સા ન ત્વયા કિન્તુ તવ યશસા યશોગાનેનેત્યન્વયઃ ।
૧૨। અત્રત્યમાનસે વર્તમાનો મોહઃ પાણ્ડુરઙ્ગપુરં વદતિ । હન્તેતિ ખેદે । સ્વયોત્યધ્યાહાર્યમ્ । ત્વયિ તતે સતિ સર્વત્ર પ્રથિતયશસિ સતિ અહં તે તવ વિજયે કથં તિષ્ઠામિ । ત્વાં વિજેધ્યે ઇત્યર્થઃ ।
૧૩। રદતિ વિદીર્ણો ભવતિ । દ્રવીભવતીત્યર્થઃ ।
૧૪। પાપાનામ્ ।
૧૫। સત્રપો દેવઃ । દેવલોક ઇત્યર્થઃ ।
૧૬। લજ્જાન્વિતઃ ।
૧૭। ભવઃ સંસારોઽસ્ત્વસ્વ તેન । સંસારિણેત્યર્થઃ ।
૧૮। પદ્મનાભિના પદ્મનાભેન વિષ્ણુનેતિ યાવત્ ।
૧૯। અતિરસાત્પ્રેમ્ણોઽતિશયેન ।
૨૦। મુક્તાશ્ચ યોગિનશ્ચ તાન્ ।
૨૧। અસીમામમર્યાદામ્ ।
૨૨। અચ્છા નિર્મલૈવ ધીસ્તાં, અસીમામ્, ઉદારતાં વેત્તીતિ યોજના ।
૨૩। બૃહસ્પતિમ્ ।
૨૪। મમ જનાઃ મદ્ભક્તાઃ ।
૨૫। અતિતેજસ્વી ।
૨૬। ઇયં વિઠ્ઠલશબ્દસ્ય નિરુક્તિઃ ।
૨૭। અત્ર કવિમાતૃકાયામપિ સમાપ્તિદ્યોતકો। લેખો ન દૃશ્યતે ।

Proofread by Rajesh Thyagarajan

*Panduranga Stotram 1*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*